(२) 1632

व्याकरण संस्कृत संपूर्ण

क्र.नं. १२
८ । व्या। २८

निरुक्त—परिचय


इ. का. राजवाडे संशोधन मंडळ
क्रमांक .........
हस्त लिखित ग्रंथ संग्रह.
Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

इ. वि. का. राजवाडे संशोधन मंदिर
क्रमांक 12
हस्त लिखित ग्रंथ संग्रह.

# ॥ अथ निरुक्तम् ॥

## पूर्वषट्कम्। अध्यायः१ ॥

श्रीगणेशायनमः॥ हरिः ॐ तत्सत्॥ समाम्नायःस
माम्नातःस व्याख्यातव्यस्तमिमं समाम्नायं निघण्टव इ
त्याचक्षते निघण्टवः कस्मान्निगमा इमे भवन्ति छन्दोभ्यः
समाहृत्य समाहृत्य समाम्नातास्ते निगन्तव एव सन्तो नि
गमनान्निघण्टव उच्यन्त इत्यौपमन्यवोपि वा हननादेव-
स्युः समाहता भवन्ति यद्वा समाहृता भवन्ति। तद्यान्येता
नि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च
तानीमानि भवन्ति तत्रैतन्नामाख्यातयोर्लक्षणं प्रदिश-
न्ति भावप्रधानमाख्यातं सत्वप्रधानानि नामानि तद्यत्रो
भे भावप्रधाने भवतः पूर्वापरीभूतं भावमाख्यातेनाचष्टे
व्रजति पचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तं मूर्तं सत्वभूतं
सत्वनामभिर्व्रज्या पक्तिरित्यद इति सत्वानां उपदेशो गौ
रश्वः पुरुषो हस्तीति भवतीति भावस्यास्ते शेते व्रजति ति
ष्ठतीतीन्द्रियनित्यं वचनमौदुम्बरायणः॥१॥

तत्र चतुष्ट्वं नोपपद्यते युगपदुत्पन्नानां वा शब्दानामि-
तरेतरोपदेशः शास्त्रकृतो योगश्च व्याप्तिमत्वात्तु शब्दस्याणी-
यस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके तेषां मनु
ष्यवद्देवताभिधानं पुरुषविद्यानित्यत्वात्कर्मसम्पत्तिर्मंत्रो
वेदे षड्भावविकारा भवन्तीति वार्ष्यायणिः जायतेऽस्ति
विपरिणमते वर्द्धतेऽपक्षीयते विनश्यतीति जायत इति

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

पूर्वभावस्यादिमाचष्टे नापरभावमाचष्टे न प्रतिषेधतीत्यस्ती
त्युत्पन्नस्य सत्त्वस्यावधारणं विपरिणमत इत्यप्रच्यवमा
मानस्य तत्त्वाद्विकारं वर्धत इति स्वाङ्गाभ्युच्चयं सांयौगि-
कानां वार्थानां वर्धते विजयेनेति वा वर्द्धते शरीरेणेति वाप
क्षीयत इत्येतेनैव व्याख्यातः प्रतिलोमं विनश्यतीत्यपर
भावस्यादिमाचष्टे न पूर्वभावमाचष्टे न प्रतिषेधति ॥ २॥

अतोन्ये भावविकारा एतेषामेव विकारा भवन्ती
ति ह स्माह ते यथावचनमभ्यूहितव्या न निर्बद्धा उपस
र्गा अर्थान्निराहुरिति शाकटायनो नामाख्यातयोर्ना
माख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्त्युच्चाव
चाः पदार्था भवन्तीति गार्ग्यस्तद्य एषु पदार्थः प्राहुरि
मे तन्नामाख्यातयोरर्थविकरणमा इत्य[illegible]र्वागर्थे
प्रपरेत्येतस्य प्रातिलोम्यमभीत्याभिमुख्यं प्रतीत्ये
तस्य प्रातिलोम्यं सु अति सु इत्यभिपूजितार्थे निर्दुरि-
त्येतयोः प्रातिलोम्यं न्यवेति विनिग्रहार्थीयावुदित्ये
तयोः प्रातिलोम्यं समित्येकीभावं व्यपेत्येतस्य प्रातिलो-
म्यमन्विति सादृश्यापरभावमपीति संसर्गमुपेत्युप
जनं परीति सर्वतो भावमधीत्युपरिभावमैश्वर्यं
वेवमुच्चावचानर्थान्प्राहुस्त उपेक्षितव्याः ॥ ३॥

अथ निपाता उच्चावचेष्वर्थेषु निपतन्त्यप्युप
मार्थेपि कर्मोपसंग्रहार्थेपि पदपूरणास्तेषामेते

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

चत्वारं उपमार्थे भवन्तीवेति भाषायां चान्वध्यायं चा
ग्निरिवेन्द्र इवेति नेति प्रतिषेधार्थीयो भाषायामु
भयमन्वध्यायं न्नेन्द्रं देवममंसतेति प्रतिषेधार्थी
यः पुरस्तादुपाचारस्तस्य यत् प्रतिषेधति दुर्मदासो
न सुरायामित्युपमार्थीय उपरिष्टादुपाचारस्तस्य
येनोपमिमीते चिदित्येषोनेककर्माचार्यश्चिदिदं ब्रूयादि
ति पूजायामाचार्यः कस्मादाचार्य आचारं ग्राहयत्याचि
नोत्यर्थानाचिनोति बुद्धिमिति वा दधिचिदित्युपमार्थे कुल्मा
षांश्चिदाहरेत्यवकुत्सिते कुल्माषाः कुलेषुसीदन्ति नुइत्ये
षोनेककर्मेदं नुकरिष्यतीति हेत्वपदेशे कथं नु करिष्यती
त्यनुपृष्टे नन्वेतदकार्षीदिति चाथाप्युपमार्थे भवति ॥ वृ
क्षस्य नु ते पुरुहूत वयाः ॥ वृक्षस्येव ते पुरुहूत शाखा वयाः शा
खा वेतेर्वातायना भवन्ति शाखाः खशयाः शक्नोतेर्वाथय-
स्यागमादर्थपृथक्त्वमह विज्ञायते न त्वौद्देशिकमिव विग्रहे
णं पृथक्त्वात्सकर्मोपसङ्ग्रहश्चेति समुच्चयार्थ उभाभ्यां सं
प्रयुज्यतेहं च त्वं च वृत्रहन्नित्येतस्मिन्नेवार्थे देवेभ्यश्च पि-
तृभ्य एत्याकारो वेति विचारणार्थे हन्ताहं पृथिवीमिमां नि
दधानीह वेह वेत्यथापि समुच्चयार्थे भवति ॥ ४ ॥

ऋचां त्वः पोषमास्ते पुपुष्वान्
गायत्रं त्वो गायति शक्वरीषु ।

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai joint project

ब्रह्मा त्वो वदति जातविद्यां
यज्ञस्य मात्रां विमिमीत उ त्वः ॥

इत्यृत्विक्कर्मणां विनियोगमाचष्टे ऋचामेकः पोषमास्ते पुपुष्वान्होता गर्चनी गायत्रमेको गायति शक्करीषूद्गाता गायत्रं गायतेस्तुतिकर्मणः शक्कर्य ऋचः शक्नोतेस्तद्यदाभिर्वृत्रमशकद्धन्तुं तच्छक्करीणां शक्करीत्वमिति विज्ञायते ब्रह्मैको जाते जाते विद्यां वदति ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हति ब्रह्मा परिवृढः श्रुततो ब्रह्म परिवृढं सर्वतो यज्ञस्य मात्रां विमिमीत एकोऽध्वर्युरध्वर्युरध्वरयुरध्वरं युनक्त्यध्वरस्य नेताध्वरं कामयत इति वापि वाधीयाने युरुपबन्धोऽध्वर इति यज्ञनामध्वरति हिंसाकर्मा तत्प्रतिषेधो निपात इत्येके तत्कथमनुदात्तप्रकृति नाम स्याद्दृष्टव्ययं तु भवत्युत त्वं सख्ये स्थिरपीतमाहुरिति द्वितीयायामुतो त्वस्मै तन्वं विसस्र इति चतुर्थ्यामथापि प्रथमाबहुवचने ॥ ८ ॥

अथ वेदमंत्रानर्थक्यं कौत्साचार्येण प्रतिपादितं तद्विषये यास्कमुनिराह। पूर्वः पक्षः॥ अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यतेऽर्थमप्रतियतो नात्यन्तं स्वरसंस्कारोद्देशस्तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकं च यदि मंत्रार्थप्रत्ययायानर्थकं भवतीति कौत्सोऽनर्थका हि मंत्रास्तदेतेनोपेक्षितव्यं नियतवाचो युक्तयो नियतानुपूर्व्या भवन्त्यथापि ब्राह्मणेन रूपसम्पन्ना विधीयन्ते इत्यादि॥ १५॥ पू॰ष॰अ॰१ ॥ उरु प्रथस्वेति प्रथयति प्रो-

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

हाणीति प्रोहत्यथाप्यनुपपन्नार्था भवन्त्योषधे त्रायस्वैनं स्वधि
ते मैनं हिंसीरित्याह हिंसन्नथापि विप्रतिषिद्धार्था भवन्ति॥
"एक एव रुद्रोव◆तस्थे नद्वितीयः। "असंख्याता सहस्राणि ये रु
द्रा अधिभूम्याम्"। अशत्रुरिन्द्र जज्ञिषे शतं सेना अजयत् साकमि
न्द्र इत्यथापि जानन्तं सम्प्रेष्यत्यग्नये समिध्यमानायानुब्रूही
त्यथाप्याहादितिः सर्वमित्यदितिर्द्यौरदितिरन्तरिक्षमिति तदु
परिष्टाद्व्याख्यास्यामोथाप्य विस्पष्टार्था भवन्त्यम्यग्यादृश्मिंजा
रयायि काणुकेति॥ १५॥

अर्थवन्तः शब्दसामान्यादेतद्वै यज्ञस्य समृद्धं यद्रूपस
मृद्धं यत्कर्म क्रियमाणमृग्यजुर्वाभिवदतीति च ब्राह्मणं क्रीळन्तौ
पुत्रैर्नप्तृभिरिति यथो एतं नियतवाचो युक्तयो नियतानुपूर्व्या भ-
वन्तीति लौकिकेष्वप्येतद्यथेन्द्राग्नी पिता पुत्राविति यथो एतं-
द्ब्राह्मणेन रूप◆सम्पन्ना विधीयन्त इत्युदितानुवादः स भवति यथो
एतंदनुपपन्नार्था भवन्तीत्याम्नायवचनादहिंसा प्रतीयेत यथो
एतं द्विप्रतिषिद्धार्था भवन्तीति लौकिकेष्वप्येतद्यथा सम्पन्नो
यं ब्राह्मणो न मित्रो राजेति यथो एतज्जानन्तं सम्प्रेष्यतीति जा
नन्तमभिवादयते जानते मधुपर्कं प्राहेति यथो एतंददितिः स
र्वमिति लौकिकेष्वप्येतद्यथा सर्वरसा अनुप्रासाः पानीयमि-
ति यथो एतंदविस्पष्टार्था भवन्तीति नैष स्थाणोरपराधो यदे
नमन्धो न पश्यति पुरुषापराधः स भवति यथा जानपदीषु वि
द्यातः पुरुषविशेषो भवति पारोवर्यवित्सु तु खलु वेदितृषु भू-

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

यो विद्यः प्रशस्यो भवति ॥ १६ ॥

अथापीदमन्तरेण पदविभागो न विद्यते। अवसाय पद्वते रुद्र मृळेति पद्वदवसं गावः पथ्यदनं भवति गतेस्त्वर्थस्यासो नामकरणं स्तस्मान्नावगृह्णन्त्यवसायाश्वानिति स्यतिरुपसृष्टो विमोचने तस्मादवगृह्णन्ति दूतो निर्ऋत्या इदमाजगामेति पञ्चम्यर्थप्रेक्षा वा षष्ठ्यर्थप्रेक्षा वाःकारान्तं परो निर्ऋत्या आचक्ष्वेति चतुर्थ्यर्थप्रेक्षैकारान्तं परः सन्निकर्षः संहिता पदप्रकृतिः संहिता पदप्रकृती नि सर्वचरणानां पार्षदान्यथापि याज्ञे दैवतेन बहवः प्रदेशा भवन्ति तदेतेनोपेक्षितव्यं ते चेद्ब्रूयुर्लिङ्गज्ञा अत्र स्म इति॥ इन्द्रं न त्वा शवसा देवता वायुं पृणन्तीति वायुलिङ्गं चेन्द्रलिङ्गं चाग्नेये मंत्रे अग्निरिव मन्यो त्विषितः सहस्वेति तथाग्निर्मान्यवे मंत्रे त्विषितो ज्वलितस्त्विषिरित्यप्यस्य दीप्तिनाम भवत्यथापि ज्ञानप्रशंसा भवत्यज्ञाननिन्दा च ॥ १७ ॥

स्थाणुरयं भारहारः किलाभूदधीत्य
वेदं न विजानाति योऽर्थम्। योऽर्थज्ञ इत्
सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा॥ यद्गृहीतमविज्ञातं निगदे
नैव शब्द्यते। अनग्नाविव शुष्कैधो न
तज्ज्वलति कर्हिचित् ॥

स्थाणुस्तिष्ठतेरर्थोऽरणस्थो वा ॥ १८ ॥ ॥ ओम् ॥

"Joint project of the Rajawade Sanshodhak Mandal Dhule and the Yashwantrao Chavan Pratishthan Mumbai."

उत त्वः पश्यन्न ददर्श वाच-
मुत त्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वं वि सस्रे
जायेव पत्य उशती सुवासाः॥

अप्येकः पश्यंन पश्यति वाचमपि च शृण्वंन शृणोत्ये
नामित्यविद्वांसमाहार्धमप्येकस्मै तन्वं विसस्र इति स्व
मात्मानं विवृणुते ज्ञानं प्रकाशनमर्थस्याहानया वाचोप
मोत्तमया वाचा जायेव पत्ये कामयमाना सुवासा ऋतुका
लेषु सुवासाः कल्याणवासाः कामयमानार्तुकालेषु य
था स एनां पश्यति स शृणोतीत्यर्थज्ञप्रशंसा तस्योत्तरा भू-
यसे निर्वचनाय॥१९॥

उत त्वं सख्ये स्थिरपीतमाहु-
र्नैनं हिन्वन्त्यपि वाजिनेषु।
अधेन्वा चरति माययैष
वाचं शुश्रुवाँ अफलामपुष्पाम्॥

अप्येकं वाक्सख्ये स्थिरपीतमाहू रममाणं विपीता
र्थं देवसख्ये रमणीये स्थान इति वा विज्ञातार्थं यन्नाप्नुवन्ति
वाग्ज्ञेयेषु बलवत्स्वप्यधेन्वा ह्येष चरति मायया वाक्प्रति
रूपया नास्मै कामान्दुग्धे वाग्दोह्यान्देवमनुष्यस्थानेषु
यो वाचं श्रुतवान्भवत्यफलामपुष्पामित्यफलास्मा अपु-

"Jointly by the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

ष्यावाग्भवतीति वा किञ्चित् पुष्पफलेति वार्थं वाचः पुष्प-
फलमाह याज्ञदैवते पुष्पफले देवताध्यात्मे वा साक्षात्कृत
धर्माण ऋषयो बभूवुस्ते वरेभ्यो साक्षात्कृतधर्मभ्य उपदे-
शेन मन्त्रान्त्संप्रादुरुपदेशाय ग्लापयन्तो वरे बिल्म
ग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च बिल्मं
भिल्मं भासनमिति वैतावन्तः समानकर्माणो धातवो धा
तुर्दधातेरेतावन्त्यस्य सत्वस्य नामधेयान्येतावतामर्था
नामिदमभिधानं नैघण्टुकमिदं देवतानाम प्राधान्येनेद
मिति तद्यदन्यदेवते मन्त्रे निपतति नैघण्टुकं तत्॥ अश्वं
न त्वा वारवन्तं। अश्वमिव त्वा वालवन्तं वाला दंशवारणा-
र्था भवन्ति दंशो दशतेः। मृगो न भीमः कुचरो गिरिष्ठाः॥
मृग इव भीमः कुचरो गिरिष्ठा मृगो मार्ष्टेर्गतिकर्मणो भी
मो बिभ्यत्यस्माद्भीष्मोप्येतस्मादेव कुचर इति चरतिक
र्म कुत्सितमथ चेद्देवताभिधानं क्वायन्न चरतीति गिरि
ष्ठा गिरिस्थायी गिरिः पर्वतः समुद्गीर्णो भवति पर्ववान् प
र्वतः पर्व पुनः पृणातेः प्रीणातेर्वार्धमास पर्व देवानस्मिन्प्री-
णन्तीति तत्प्रकृतीतरत्सन्धिसामान्यान्मेघस्थायी मे
घोपि गिरिरेतस्मादेव तद्यानि नामानि प्राधान्यस्तुतीनां
देवतानां तद्दैवतमित्याचक्षते तदुपरिष्टाद्व्याख्यास्यामो नै
घण्टुकानि नैगमानीहेह ॥२०॥ इति निरुक्ते पूर्वषट्के प्रथ
माध्यायः॥ हरिः ओम्॥ तत्सत्॥ श्रीकृष्णार्पणम्॥ ७॥

## अथ निरुक्ते पूर्वषट्के द्वितीयाध्यायः॥

अथ निर्वचनं तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रा
देशिकेन गुणेनान्वितौ स्यातां तथा तानि निर्ब्रूयादथानन्वि
तेर्थे प्रादेशिके [redacted] विकारे र्थ नित्यः प
रीक्षेत केनचिद्वृत्तिसामान्येनाविद्यमाने सामान्ये प्यक्ष
रवर्णसामान्यान्निर्ब्रूयान्नत्वेवन निर्ब्रूयान्न संस्कारमा-
द्रियेत विशयवत्यो हि वृत्तयो भवन्ति यथार्थं विभक्तीः सं
नमयेत्प्रत्तमवत्तमिति [redacted] धात्वादी एव शिष्येते अथाप्यस्ते
र्निवृत्तिस्थानेष्वादिलोपो भवति स्तः सन्तीत्यथाप्यन्त
लोपो भवति गत्वा गतमित्यथाप्युपधालोपो भवति ज
ग्मतुर्जग्मुरित्यथाप्युपधाविकारो भवति राजा दण्डीत्य
थापि वर्णलोपो भवति तत्वा यामीत्यथापि द्विवर्णलोपस्तृ
च इत्यथाप्यादिविपर्ययो भवति ज्योतिर्घनो बिन्दुर्वाट्य इ-
त्यथाप्या[redacted]द्यंतविपर्ययो भवति स्तोका
रज्जुः सिकतास्तर्कीत्यथाप्यन्तव्यापत्तिर्भवति॥१॥

राज्ञः पुरुषो राजपुरुषो राजा राजतेः पुरुषः पुरि
षादः पुरिशयः पूरयतेर्वा पूरयत्यंतरित्यंतरपुरुषमभिप्रे
त्य। यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्या
यो स्ति कश्चित्। वृक्षइवस्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं
पुरुषेण सर्वमित्यपि निगमो भवति। विश्वकद्राकर्षो वीति
च कद्रु इति श्वगतौ भाष्यते द्रातीति गतिकुत्सनो कद्रातीति
द्राति कुत्सनार्थं कद्राति कद्रातीति सतो नर्थको भ्यासस्त-

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

दस्मिन्नस्तीति विश्वकद्रुः कल्याणवर्णरूपः कल्याणवर्णस्येवा-
स्य रूपं कल्याणं कमनीयं भवति वर्णो वृणोते रूपं रोचतेरेवं त
द्धितसमासान्निर्ब्रूयान्नैकपदानि निर्ब्रूयान्नावैयाकरणाय
नानुपसन्नायानिदंविदे वा नित्यं ह्यविज्ञातुर्विज्ञाने, सूयोप
सन्नाय तु निर्ब्रूयाद्यो वालं विज्ञातुं स्यान्मेधाविने तपस्वि
ने वा ॥ ३॥

तत्राधुनास्य शास्त्रस्य विषयनिरूपणं प्रथमं तावदधिकारिनि
रूपणं तत्राधिकारिणं निरूपयतीति मंत्राः ॥

विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेव
धिष्टेऽहमस्मि। असूयकायानृजवेऽयताय न मा ब्रू-
या वीर्यवती तथा स्याम् ॥ १॥ य आतृणत्त्यवित
थेन कर्णावदुःखं कुर्वन्नमृतं संप्रयच्छन्। तं म-
न्येत पितरं मातरं च तस्मै न द्रुह्येत्कतमच्चनाह ॥ २॥
अध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा
कर्मणा वा। यथैव ते न गुरोर्भोजनीयास्तथैव ता
न्न भुनक्ति श्रुतं तत् ॥ ३॥ यमेव विद्याः शुचिमप्रम
त्तं मेधाविनं ब्रह्मचर्योपपन्नम्। यस्ते न द्रुह्येत्कत
मच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन्निति, निधिः
शेवधिरिति ॥ ४॥

ता वां वास्तून्युश्मसि गमध्यै यत्र गावो
भूरिशृङ्गा अयासः। अत्राह तदुरुगाय

स्य वृष्णः परमं पदमव भाति भूरि ॥

तानि वां वास्तूनि कामयामहे गमनाय यत्र गावो भूरिशृङ्गा बहुशृङ्गा भूरीति बहुनो नामधेयं प्रभवतीति सतः शृङ्गं श्रयतेर्वा शृणातेर्वा शरणायोद्गतमिति वा शिरसो [illegible] निर्गतमिति वा यासोयनास्तत्र तदुरुगायस्य विष्णोर्म[illegible]हागतेः परमं पदं परार्ध्यस्थमवभाति भूरि। पादः पद्यतेस्तं निधानात् पदं पशुपादप्रकृतिः प्रभागपादः प्रभागपादसामान्यादितराणि पदान्येवमन्येषामपि सत्वानां सन्देहा विद्यन्ते तानि चेत् समानकर्माणि समाननिर्वचनानि नानाकर्माणि चेन्नानानिर्वचनानि यथार्थं निर्वक्तव्यानीतीमान्येकविंशतिः पृथिवीनामधेयान्यनुक्रान्तानि तत्र निर्ऋतिर्निरमणादृच्छतेः कृच्छ्रापत्तिरितरा सा पृथिव्या सन्दिह्यते तयोर्विभागस्तस्या एषा भवति ॥ ७॥ पू॰ष॰अ॰२

य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात्। स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋतिमाविवेश ॥

बहुप्रजाः कृच्छ्रमापद्यत इति परिव्राजका वर्षकर्मेति नैरुक्ता य ईं चकारेति करोति किरती सन्दिग्धौ वर्षकर्मणा न सो स्य वेद मध्यमः स एवास्य वेद मध्यमो यो ददर्श दिग्योपहितं स मातुर्योनौ मातान्तरिक्षं निर्मीयन्ते ऽस्मिन् भूतानि योनिरन्तरिक्षं महानवयवः परिवीतो वायुनायमपीतरो योनिरेतस्मादेव परिस्रुतो भवति बहुप्रजा भूमिमापद्यते वर्षकर्मणा शाकपूणिः सङ्कल्पयांच-

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

क्के। सर्वा देवता जानामीति तस्मै देवतोभयलिङ्गा प्रादुर्बभूव तां न
जज्ञे तां पप्रच्छ विविदिषाणि त्वेति सास्मा एतामृचमादिदेशैषा
मद्देवतेति ॥ ८ ॥

अयं स शिङ्क्ते येन गौरभीवृता
मिमाति मायुं ध्वसनावधि श्रिता।
सा चित्तिभिर्नि हि चकार मर्त्यम्
विद्युद्भवन्ती प्रति वव्रिमौहत ॥

अयं स शब्दायते येन गौरभिप्रवृत्ता मिमाति मायुं शब्दं करोति मायुमिवादित्यमिति वा वागेषा माध्यमिका ध्वंसने मेघेऽधिश्रिता सा चित्तिभिः कर्मभिर्नीचैर्निकरोति मर्त्यं विद्युद्भवन्ती प्रत्यूहते वव्रिं वव्रिरिति रूपनाम वृणोतीति सतो वर्षेण प्रच्छाद्य पृथिवीं तत्पुनरादत्ते ॥ ९ ॥

हिरण्यनामान्युत्तराणि पञ्चदश हिरण्यं कस्माद्ध्रियत आयम्यमानमिति वा ह्रियते जनाज्जनमिति वा हितरमणं भवतीति वा हृदयरमणं भवतीति वा हर्यतेर्वा स्यात्प्रेप्साकर्मणोऽन्तरिक्षनामान्युत्तराणि षोळशान्तरिक्षं कस्मादन्तराक्षान्तं भवत्यन्तरेमे इति वा शरीरेष्वन्तःक्षयमिति वा तत्र समुद्र इत्येतत्पार्थिवेन समुद्रेण सन्दिह्यते समुद्रः कस्मात्समुद्द्रवन्त्यस्मादापः समभिद्रवन्त्येनमापः संमोदन्तेऽस्मिन्भूतानि समुदको भवति समुनत्तीति वा तयोर्विभागस्तत्रेतिहासमाचक्षते देवापिश्चार्ष्टिषेणः शन्तनुश्च कौरव्यौ भ्रातरौ बभूवतुः स श-

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

न्तनुः कनीयानभिषेचयांचक्रे देवापिस्तपः प्रतिपेदे ततः शन्त
नो राज्ये द्वादश वर्षाणि देवो न ववर्ष तमूचुर्ब्राह्मणा अधर्मस्त्व
या चरितो ज्येष्ठं भ्रातरमन्तरित्याभिषेचितं तस्मात्ते देवो न वर्ष-
तीति स शन्तनुर्देवापिं शिशिक्ष राज्येन तमुवाच देवापिः पुरो
हितस्ते सानि याजयानि च त्वेति तस्यैतद्वर्षकाम सूक्तं तस्यै-
षा भवति ॥ १०॥

आर्ष्टिषेणो होत्रमृषिर्निषीदं
देवापिर्देवसुमतिं चिकित्वान्।
स उत्तरस्मादधरं समुद्र
मपो दिव्या असृजद्वर्ष्या अभि ॥

आर्ष्टिषेण ऋष्टिषेणस्य पुत्र इषितसेनस्येति वा सेनासे
श्वरा समानगतिर्वा पुत्रः पुरुत्रायते निपरणाद्वा पुंनरकं ततस्त्रा
यत इति वा होत्रमृषिर्निषीदन्नृषिर्दर्शनात्स्तोमान्ददर्शेत्यौप
मन्यवस्तद्यदेनांस्तपस्यमानान्ब्रह्म स्वयंभ्वभ्यानर्षत्त ऋ
षयो भवंस्तदृषीणामृषित्वमिति विज्ञायते देवापिर्देवाना
मापृत्या स्तुत्या च प्रदानेन च देवसुमतिं देवानां कल्याणीं म
तिं चिकित्वांश्चेतनावान्। स उत्तरस्मादधरं समुद्रम्। उत्तर
उद्धततरो भवत्यधरो धोरो धो न धावतीत्यूर्ध्वगतिः प्रतिषि-
द्धा तस्योत्तरा भूयसे निर्वचनाय ॥ ११॥ ओम्॥

यद्देवापिः शन्तनवे पुरोहितो

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai Joint project

होत्रायं वृतः कृपयन्नदीधेत् ॥
देवश्रुतं वृष्टिवनिं रराणो
बृहस्पतिर्वाचमस्मा अयच्छत् ॥

शन्तनुः शन्नोऽस्त्विति वा शमस्मै तन्वा अस्त्विति वा पुरोहितः पुर एनं दधति होत्राय वृतः कृपायमाणोऽन्वध्यायद् देवश्रुतं देवा एनं शृण्वन्ति वृष्टिवनिं वृष्टियाचिनं रराणो रातिरभ्यस्तो बृहस्पतिर्ब्रह्मासीत्सोऽस्मै वाचमयच्छद् बृहदुप व्याख्यातम् ॥१२॥

इति निरुक्ते पूर्वषट्के द्वितीयाध्यायः ॥ हरिः ओम् ॥ ६५ ॥

अथ तृतीयाध्यायः ॥ हरिः ओम् ॥

कर्मनामान्युत्तराणि षड्विंशतिः कर्म कस्मात् क्रियत इति सतोऽपत्यनामान्युत्तराणि पञ्चदशापत्यं कस्मादपततं भवति नानेन पततीति वा तद्यथा जनयितुः प्रजैवमर्थीये ऋचा उदाहरिष्यामः ॥१॥

परिषद्यं ह्यरणस्य रेक्णो नित्यस्य रायः पत
यः स्याम ॥ न शेषो अग्ने अन्यजातमस्त्य
चेतानस्य मा पथो वि दुक्षः ॥

परिहर्तव्यं हि नोपसर्तव्यमरणस्य रेक्णोऽरणोऽपार्णो भवति रेक्ण इति धननाम रिच्यते प्रयतो नित्यस्य रायः पतयः स्याम पित्र्यस्येव धनस्य। न शेषो अग्ने अन्यजातमस्ति। शेष इत्यपत्यनाम शिष्यते प्रयतोऽचेतयमानस्य तत्प्रमत्तस्य भवति मा नः पथो विदूदुष इति तस्योत्तरा भूयसे निर्वचनाय ॥२॥

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

नहि ग्रभायारणः सुशेवो-
न्योदर्यो मनसा मन्तवा उ ॥
अधाचिदोकः पुनरित्स एत्या-
नो वाज्यभीषाळेतु नव्यः ॥

नहि ग्रहीतव्योरणः सुसुखतमोप्यन्योदर्यो मनसापि न मन्तव्यो ममायं पुत्र इत्यथ स ओकः पुनरेव तदेति यत आगतो भवत्योक इति निवासनामोच्यते ऐतु नो वाजी वेजनवा-न भिषहमाणः सपत्नान्नवजातः स एव पुत्र इत्यथैतां दुहितृदायाद्य उदाहरन्ति पुत्रदायाद्य इत्येके ॥ ३॥

शासद्वह्निर्दुहितुर्नप्त्यं गाद्विद्वाँ ऋतस्य दीधितिं सपर्यन् ॥ पिता यत्र दुहितुः सेकमृञ्जन्त्सं शग्म्येन मनसा दधन्वे ॥

प्रशास्ति वोढा सन्तानकर्मणे दुहितुः पुत्रभावं दुहिता दुर्हिता दूरे हिता दोग्धेर्वा नप्तारमुपागमत् दौहित्रं पौत्रमिति विद्वान् प्रजननयज्ञस्य रेतसो वाङ्गादङ्गात्सम्भूतस्य हृदयादधिजातस्य मातरि प्रत्यृतस्य विधानं पूजयन्नविशेषेण मिथुनाः पुत्रा दायादा इति तदेतदृक्श्लोकाभ्यामभ्युक्तम् ॥

अङ्गादङ्गात्सम्भवसि हृदयादधिजायसे । आत्मा वै पुत्रनामासि स जीव शरदः शतमित्यविशेषेण पुत्राणां दायो भवति धर्मतः । मिथुनानां विसर्गादौ मनुः स्वायम्भुवोऽब्रवीत् ॥ न दुहितर इत्येके तस्मात्पुमान्दायादोऽदाया-

दा स्त्रीति विज्ञायते तस्मात् स्त्रियं जातां परास्यन्ति न पुमां
समिति च स्त्रीणां दान विक्रियातिसर्गा विद्यन्ते न पुंसः
पुंसो पीत्येके शौनः शेपे दर्शनात्। अभ्रातृमती वाद इत्य
परम्॥ अमूर्या यन्ति जामयः सर्वा लोहितवाससः॥ अ
भ्रातर इव योषास्तिष्ठन्ति हतवर्त्मनः॥ अभ्रातृका इव
योषास्तिष्ठन्ति सन्तान कर्मणे पिण्डदानाय हतवर्त्मा
न इत्यभ्रातृकाया अनिर्वाह औपमिकस्तस्योत्तरा भू-
यसे निर्वचनाय॥ ४॥ हरिः ॐ। तत्सत्॥

अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानाम्॥ जायेव पत्य उशती सुवासा उषा हस्रेव नि रिणीते अप्सः॥

अभ्रातृकेव पुंसः पितॄनेत्यभिमुखी सन्तान कर्मणे पि-
ण्डदानाय न पतिं गर्ता रोहिणीव धनलाभाय दाक्षिगाजी ग
र्तः सभा स्थाणुर्गृणातेः सत्यसङ्गरो भवति तं तत्र या पुत्रा
या पतिका सा रोहति तां तत्राक्षैराघ्नन्ति सा रिक्थं लभते
श्मशान सञ्चयोपि गर्त उच्यते गुरतेरपगूर्णो भवति श्म-
शानं श्मशयनं श्म शरीरं शरीरं शृणातेः शम्नातेर्वा श्म श्रुलो
म श्मनिश्रितं भवति लोम लुनातेर्वा लीयतेर्वा नोपरस्याविः
कुर्याद्यदुपरस्या विकुर्याद्गर्तेष्ठास्यात् प्रमायुको इत्यपि
निगमो भवति रथोपि गर्त उच्यते गृणातेः स्तुतिकर्मणः स्तु
ततमं यानं। आरोहथो वरुण मित्र गर्तमित्यपि निगमो
भवति। जायेव पत्ये कामयमाना सुवासा ऋतुकाले षू षाह-

सनेव दन्तान् विवृणुते रूपाणीति चतस्रे उपमाना भ्रात्री
मुपयच्छेत तो कं ह्यस्य तद्भवतीत्य भ्रातृका या उपयमनप्र
तिषेधः प्रत्यक्षः पितुश्च पुत्रभावः पिता यत्र दुहितुरप्रत्ता
यां रेतः सेकं प्रार्जयति सन्दधात्यात्मानं सङ्गमेन मनसेत्य
थैतां जाम्या रिक्थप्रतिषेध उदाहरन्ति ज्येष्ठं पुत्रिकाया
इत्येके ॥ ५॥

न जामये तान्वो रिक्थमारैक् चकार ग
र्भं सनितुर्निधानम् ॥ यदी मातरो जनय
न्त वह्निमन्यः कर्ता सुकृतोरन्य ऋन्धन् ॥

न जामये भगिन्यै जामिरन्ये ऽस्यां जनयन्ति जामपत्यं
जमतेर्वा स्याद्गतिकर्मणो निर्गमनप्राया भवति तान्व आ-
त्मजः पुत्रो रिक्थं प्रारिचत्प्रादाच्चकारैनां गर्भनिधानीं
सनितुर्हस्तग्राहस्य यदि ह मातरो जनयन्त वह्निं पुत्रम
वह्निं च स्त्रियमन्यतरः सन्तानकर्ता भवति पुमान् दा-
यादोऽन्यतरोऽर्धयित्वा जामिः प्रदीयते परस्मै ॥ ६॥

मनुष्यनामान्युत्तराणि पञ्चविंशतिर्मनुष्याः
कस्मान्मत्वा कर्माणि सीव्यन्ति मनस्यमानेन सृष्टा मन
स्यतिः पुनर्मनस्वीभावे मनोरपत्यं मनुषो वा तत्र पञ्च
जना इत्येतस्य निगमा भवन्ति ॥ ७॥

तदद्यवाचः म॰मं मसीय येनासुराँ अभिदे ॰थ
वा असाम ॥ ऊर्जाद उत यज्ञियासः पंच
जना मम होत्रं जुषध्वम् ॥

Joint project of the Rajawade Sanshodhak Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

तद्ब्रवाचः परमं मंसीय येनासुरानभिभवेम देवा असुरा
असुरता स्थानेष्वस्ता स्थानेभ्य इति वा पिवासुरिति प्राणनामा
स्तः शरीरे भवति तेन तद्वन्तः सोऽदेवानसृजत तत्सुराणां सुरत्वं म
सोऽसुरानसृजत तदसुराणामसुरत्वमिति विज्ञायते ॥ ऊर्जा
द उत यज्ञियासः ॥ अन्नादाश्च यज्ञियाश्चोर्गित्यन्ननामोर्ज
यतीति सतः पक्वं सुप्रवृक्णमिति वा ॥ पञ्चजना मम होत्रं जु
षध्वम् ॥ गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके चत्वारो व
र्णा निषादः पञ्चम इत्यौपमन्यवो निषादः कस्मान्निषदनो
भवति निषण्णमस्मिन् पापकमिति नैरुक्ताः यत्पाञ्चजन्यया वि
शा ॥ पंचजनीनया विशा पंचपृक्ता संख्या स्त्रीपुंनपुंसकेष्व
विशिष्टा इति ॥ ८ ॥

त्वया वयं सुवृधा ब्रह्मणस्पते स्पार्हा वसु
मनुष्या ददीमहि ॥ या नो दूरे तळितो
या अरातयोऽभि सन्ति जम्भया ता अनप्नसः ॥

त्वया वयं सुवर्धयित्रा ब्रह्मणस्पते स्पृहणीयानि वसूनि म
नुष्येभ्य आददीमहि याश्च नो दूरे तळितो याश्चान्तिके रातयो
दानकर्माणो वा दानप्रज्ञा वा जंभय ता अनप्नसो ऽप्नसो इति रूप
नामाप्नोतीति सतो विद्युत्तडिद्भवतीति शाकपूणिः सा ह्यवता
डयति दूराच्च दृश्यते पित्विदमन्तिकनामैवाभिप्रेतं स्यात् ॥ ११ ॥

यत्रा सुपर्णा अमृतस्य भागमनिमेषं वि
दथाभिस्वरन्ति ॥ इनो विश्वस्य भुवन
स्य गोपाः स मा धीरः पाकमत्रा विवेश ॥

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

यत्र सुपर्णाः सुपतनां आदित्य रश्मयों मृतस्य भाग मुदकस्यां
निमिषन्तो वेदने नांभि स्वरन्तीति वां भिप्र यन्ती तिवें श्वरः सर्वे षांभू
तानां गो पा यिता दित्यंः समा धीर पाक मत्रा विवेशो तिं धीरो धीमा
न् पाकः पक्तव्यो भवतिं विपक्क प्रज्ञ आदित्य इं त्युप निष द्वर्णोक्ष
भवतीं त्यधिदैवत मथा ध्यात्मं यत्रसुपर्णाः सुपतनानी न्द्रियां
ण्य मृतस्य भागं ज्ञा नस्यां नि मिषंतो वे दने नां भिस्वर न्तीति वां
भिप्रयन्ती तिवेश्वरः सर्वे षा मिंद्रियाणां गो पायिता त्मां समा
धीरः पाकमत्रा विवेशे तिं धीरो धीमान् पाकः पक्तव्यो भव तिं
विपक्क प्रज्ञ आत्मे त्या त्मगति मान्वष्टें ॥ १४ ॥ इति निरुक्ते
पूर्वषट्के तृतीया ध्यायः ॥ ३ ॥ हरिःओंतत्सद्ब्रह्मार्पणमस्तु ॥

---

## ॥ अथ चतुर्थाध्यायः ॥

हरिः ओम् ॥ जुष्टो दमूंना अतिथि र्दुरो ण
इमं नों यज्ञ मुपं या हि विद्वान् ॥
विश्वां अग्ने अभि युजों विहत्यां
शत्रू यता मा भरा भोजनानि ॥

अतिथिरभ्यतितो गृहान् भर्वत्य भ्येति तिथिषुं पर कुलानी-
ति वां परगृहाणीति वां दुरोण इति गृह नामं। दुरवा भव न्ति दु
स्तर्पा इमं नो यज्ञ मुप या हि विद्वान्ं त्सर्वा अग्ने अभियुजोवि-
हत्यं शत्रू यतां मा भर भोजना निं हत्यान्ये षां बलानि शत्रूणां
भवनादाहर भोजनानीतिवां धनानीति वां इति ॥ ५ ॥

तित उपरि पवनं भवतिं ततवद्धा तुन्नवं द्धा तिलमात्रतु
न्नमिति वां ॥ ९ ॥ शिवम् ॥ ६५ ॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com